## चतुर्थी सम्प्रदाने । (१३/५७०)

[1]सम्प्रदाने कारके चतुर्थी विभक्तिर्भवति । [2]उपध्यायाय गां ददाति । [3]माणवकाय भिक्षां ददाति । देवदत्ताय रोचते[4] । पुष्पेभ्यः स्पृहयति [5]इत्यादि ।

[१२०] चतुर्थीविधाने तादर्थ्य उपसङ्ख्यानम् । (म.भा. १.४४९)

यूपाय दारु । [6]कुण्डलाय हिरण्यम् । रन्धनाय स्थाली । [7]अवहननायोलूखलम्[8] ।

[१२१] [9]क्लृपि सम्पद्यमाने चतुर्थी वक्तव्या । (म.भा. १.४४९)

मूत्राय कल्पते [10]यवागूः । उच्चाराय कल्पते यवागूः । [11]क्लृपि इत्यर्थनिर्देशः । मूत्राय सम्पद्यते यवागूः । मूत्राय जायते यवागूः ।

[१२२] [12]उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या । (म.भा. १.४४९)

वाताय कपिला विद्युदातपायातिलोहिनी ।
[13]पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्[14] ॥ (म.भा. १.४४९)

[१२३] हितयोगे चतुर्थी वक्तव्या । (म.भा. १.४५०)

[15]गोभ्यो हितम् । अरोचकिने हितम्[16] ॥

## क्रियार्थोपपदस्य च कर्मणि स्थानिनः । (१४/५८१)

क्रियार्था [17]क्रिया उपपदं यस्य[18] सोऽयं क्रियार्थोपपदः । 'तुमुन्-ण्वुलौ क्रियायां क्रियार्थायाम्' (३.३.१०/३१७५) इत्येष विषयो लक्ष्यते । क्रियार्थोपपदस्य [19]च स्थानिनोऽप्रयुज्यमानस्य धातोः कर्मणि कारके चतुर्थी विभक्तिर्भवति । द्वितीयापवादो योगः । एधेभ्यो व्रजति । [20]पुष्पेभ्यो व्रजति । क्रियार्थोपपदस्य इति किम् ? प्रविश पिण्डीम् । प्रविश तर्पणम् । भक्षिरत्र स्थानी, न तु क्रियार्थोपपदः । कर्मणि इति किम् ? एधेभ्यो व्रजति शकटेन । स्थानिनः इति किम् ? एधानाहर्तुं व्रजति ॥

## तुमर्थाच्च भाववचनात् । (१५/५८२)

तुमुना समानार्थस्तुमर्थः । तुमर्थभाववचनप्रत्ययान्तात् [21]प्रातिपदिकाच्च् चतुर्थी विभक्तिर्भवति । 'भाववचनाश्च' (३.३.११/३१८०) इति वक्ष्यति, तस्येदं ग्रहणम् । पाकाय व्रजति । त्यागाय व्रजति । भूतये व्रजति । [22]संपत्तये व्रजति । तुमर्थात् इति किम् ? पाकः । त्यागः । रागः । भाववचनात् इति किम् ? कारको (३.३.१०/३१७५) व्रजति ॥

---

1. संप्रदानकारके ग. 2. देवदत्ताय ह. 3. उदाहरणमिदं नास्ति ड. 4. मोदकः इत्यधिकम् क.इ.फ. ड.ह.ग. 5. देवदत्ताय क्रुध्यति । देवदत्ताय राध्यति । देवदत्ताय गां प्रतिशृणोति । होत्रेऽनुगृह्णाति इत्यधिकम् ह, इत्यादि नास्ति क.ग.ड.फ. 6. उदाहरणमिदं नास्ति फ. 7. उदाहरणमिदं नास्ति ह. 8. इति इत्यधिकम् क. 9. कृपि इ. 10. यवान्नम् ड.इ.ग.फ, उदाहरणमिदं नास्ति ह. 11. कृपि ड. 12. उत्पाते फ. 13. पीता भवति सस्याय म.भा. 14. इत्यादि इत्यधिकम् इ. 15. उदाहरणमिदं नास्ति फ. 16. हितमामयाविने इत्यधिकम् क.ड.इ.फ. 17. क्रिया नास्ति ह. 18. स्थानिनः इत्यधिकम् फ. 19. च नास्ति फ. 20. फलेभ्यः क.इ.फ, उदाहरणमिदं नास्ति ड. 21. प्रातिपदिकात् नास्ति इ. 22. संमतये ड, संमते ह, सन्नतये ग.